## साम आकम् । (३३/४००)

साम इति षष्ठीबहुवचनमागतसुट्कं गृह्यते। तस्य युष्मदस्मद्भ्याम् उत्तरस्य आकम् इत्ययमादेशो भवति। युष्माकम् । अस्माकम् । अथ किमर्थमागत[1]सुट्को गृह्यते, न ह्यादेशविधानकाले[2] सुड् [3]विद्यते ? तस्यैव [4]तु भाविनः सुटो निवृत्त्यर्थम् । [5]आदेशे कृते हि शेषेलोपे[6] युष्मदस्मदोरकारान्तत्वात् सुट् प्राप्नोति, स स्थान्यन्तर्भूतत्वात् निवर्तते। दीर्घोच्चारणं सवर्णदीर्घार्थम् । [7]अकमि तु सति ह्रस्वकरणे तद्विधानसामर्थ्यादेव सवर्णदीर्घत्वं न प्राप्नोति ? तत्सामर्थ्यमेत्वं प्रति भविष्यति इति अकारकरणमेत्वनिवृत्त्यर्थम् इति। अतो गुणे (६.१.९७/१९१) पररूपत्वं स्यात् ॥

## आत औ णलः । (३४/२३७१)

आकारान्तादङ्गादुत्तरस्य णलः औकारादेशो भवति । [8]पपौ । तस्थौ । जग्लौ । मम्लौ । अत्र औत्वम्, एकादेशः, [9]स्थानिवद्भावः, द्विर्वचनम् इत्यनेन क्रमेण कार्याणि क्रियन्ते। एकादेशादनवकाशत्वादौत्वं द्विर्वचनादपि परत्वादे[10]कादेशः इति ॥

## तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् । (३५/२१९७)

तु हि इत्येतयोः आशिषि विषये तातङ आदेशो भवत्यन्यतरस्याम् । जीवताद् भवान् । जीवतात् त्वम् । जीवतु भवान् । जीव त्वम् । ङित्करणं गुणवृद्धिप्रतिषेधार्थम् इति सर्वादेशस्तातङ भवति । ङित्त्वाच्च चास्य स्थानिवद्भावात् यत् पित्त्वं प्राप्नोति तन्निवर्तते । ङिच्च पित् न भवति । तेन 'ब्रुव ईट्' (७.३.९३/२४५२) इति ब्रूताद् भवान् इति ईट् न भवति । आशिषि इति किम् ? ग्रामं गच्छतु भवान् । गच्छ त्वम् ।

तातङि ङित्त्वं सङ्क्रमकृत् स्यादन्त्यविधिश्चेत् तच्च तथा न।
हेरधिकारे हेरधिकारो लोपविधौ [11]तु ज्ञापकमाह ॥

तातङो ङित्त्वसामर्थ्यान्नायमन्त्यविधिः स्मृतः।
न तद्वदनङादीनां तेन तेऽन्त्यविकारजाः ॥

## विदेः शतुर्वसुः । (३६/३१०८)

'विद ज्ञाने' (धा.पा. १०६५) [12]इत्येतस्माद् धातोरुत्तरस्य शतुः वसुरादेशः भवति । विद्वान्, विद्वांसौ, विद्वांसः[13] । [14]स्थानिवद्भावादुगित्कार्ये सिद्धे वसोः उकारकरणं 'वसोः सम्प्रसारणम्' (६.४.१३१/४३५) इत्यत्र क्वसोरपि सामान्यग्रहणार्थम् । 'एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य' (व्या.प. ५२) इत्येतदपि न भवति । तथा सति उकारकरणमनर्थकं स्यात् । अन्यतरस्यांग्रहणं केचिदनुवर्तयन्ति । विदन्, विदन्तौ, विदन्तः[15] ॥

---

1. सुट्कं ब, सुट्क इति क. 2. एव इत्यधिकम् इ. 3. विधीयते इ. 4. उत्तरकालभाविनः क. 5. अतोऽपि हि इत्यधिकम् क.इ. 6. च इत्यधिकम् क.इ.ई. 7. अकम् इति हि सति अकारकरणम् एत्वनिवृत्त्यर्थम् इति क.ड.इ.ई.ह. 8. ययौ ब.क.इ.ह. 9. स्थानिवद्भावात् क.ड.इ.ई.ह. 10. आदेशः क. 11. तज् ड. 12. इति नास्ति क. 13. विदन् विदन्तौ विदन्तः इत्यधिकम् क.ह. 14. स्थानिवद्भावादेव क. 15. इत्येतदपि सिद्धं भवति इत्यधिकम् ड.